संस्कृतसामान्यम्। उपशास्त्री II 17-12-2020

अनिवार्यपत्रम् निबन्धः

Date
Page

## "छात्रजीवने अनुशासनम्।"

तत्र चतुर्विधः आश्रमः भवति – ब्रह्मचर्यः, गृहस्थः, वाणप्रस्थः संन्यासश्च। चतुर्षु आश्रमेषु ब्रह्मचर्यः प्रमुखः भवति। ब्रह्मचर्यावस्था एव छात्रजीवनं भवति। एष कालः जनानां निर्माणकालः। अस्मिन् काले छात्राः ब्रह्मचर्यं पालयन्ति। अध्ययन तथा च स्वाध्याय-माध्यमेन ज्ञानं लभन्ते। अस्य ज्ञानस्योपयोगं ते गृहस्थजीवने कुर्वन्ति। सफलजीवनयापनाय अनुशासनस्यातीवावश्यकता वर्तते।

शासनम् अनु अनुशासनम् अर्थात् मानवसमाजनिर्मितेन नियमानि पालयन्तः लोकाः अनुशासिताः कथ्यन्ते। अनुशासनाभावे समाजे मानवजीवने च उच्छृङ्खलता आयाति। सर्वे स्वेच्छाचारं कुर्वन्तः न कथमपि आत्मोन्नतिं समाजोन्नतिञ्च कर्तुं समर्थाः भवन्ति। पारिवारिकी सामाजिकी च व्यवस्था नंक्ष्यति। विद्यार्थिनः उद्दण्डाः भविष्यन्ति। समाजे देशे च सर्वत्र अराजकता भविष्यति। अतएव छात्राणां कृते अनुशासनं परमावश्यकं वर्तते। छात्राणां कृते विद्यालय एव अनुशासनशिक्षाकेन्द्रमस्ति। अस्मिन्नेव काले छात्राणां मनःसु यः प्रभावः सम्पद्यते सः स्थायी भवति। बाल्ये अनुशासनहीनाः जना वयसि प्राप्ते अनुशासिता भविष्यन्ति इति दुराशामात्रम्। यथा क्रियते तथैव भुज्यते। अद्यत्यः छात्राः श्वः देशस्य कर्णधाराः भविष्यन्ति। अतएवानुशासनं छात्रजीवनस्य सफलतायाः कुञ्जिका

17-12-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

17-12-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । संस्कृतानुवादः ।

1. किसी लड़के ने मुझे कलम दी → कश्चिद् बालकः मह्यं कलमम् अददत् ।
2. यह किसी गरीब का घर है → इदं कस्यचिद् निर्धनस्य गृहमस्ति ।
3. किन्हीं लड़कों द्वारा कोई चोर पीटा गया → कैश्चिद् बालकैः कश्चित् चौरः ताडितः ।
4. किसी वृक्ष से पत्ते गिरे → कस्माच्चित् वृक्षात् पत्राणि अपतन् ।
5. किसी लड़की को देखो → काञ्चित् बालिकाम् पश्य ।
6. किसी गाँव से दो छात्र आए → कस्माच्चित् ग्रामात् द्वौ छात्रौ आगच्छताम् ।
7. किसी उद्यान में कोई लड़की घूम रही है → कस्मिंश्चित् / कस्मिन्चित् उद्याने काचित् बालिका भ्रमन् अस्ति ।
8. घूम रही थी → भ्रमन् आसीत् या भ्रमति स्म ।
9. किसी तालाब में तीन मछलियाँ रहती थीं → कस्मिन्चित् तडागे तिस्रः मत्स्याः वसन्ति स्म ।
10. इस विद्यालय में तीन अध्यापक हैं → अस्मिन् विद्यालये त्रयः शिक्षकाः सन्ति ।
11. इन वृक्षों पर पक्षी निवास करते हैं → एषु वृक्षेषु खगाः निवसन्ति ।
12. उन लड़कों को देखो → तान् बालकान् पश्य ।
13. उन लड़कियों में → तासु बालिकासु ।
14. सभी लड़कियाँ → सर्वाः बालिकाः ।

17-12-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

17-12-2020

साहित्यम् । शास्त्री

## छन्दालङ्कारनिर्णयः ।

"कुलेन कान्त्या वयसा नवेन
गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व
रत्नं समागच्छतु काञ्चनेन ॥"

प्रदत्तस्य श्लोकस्य प्रत्येके चरणे एकादशाक्षराः सन्त्येवात्र 'त्रिष्टुप्' जात्याः छन्दः अस्ति । श्लोकस्य पादे यगणादिनिर्णयः →

कुलेन कान्त्या वयसा नवेन, गुणैश्च तैस्तैर्विनयप्रधानैः ।
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ, । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
जगण तगण जगण गु० गु०, जगण तगण जगण गु० गु०

त्वमात्मनस्तुल्यममुं वृणीष्व, रत्नं समागच्छतु काञ्चनेन ॥
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ, । ऽ । ऽ ऽ । । ऽ । ऽ ऽ
जगण तगण जगण गु० गु०, जगण तगण जगण गु० गु०

जगणादिनिर्णयोपरान्ते ज्ञायते यदत्र त्रिष्टुप् जात्याः उपेन्द्रवज्रा छन्दः अस्ति। लक्षणमस्ति →

"उपेन्द्रवज्रा जतजास्ततो गौ ।"

## अर्थान्तरन्यासालङ्कारः ।

"सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥"

[illegible signature]
17-12-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ